| Subject | Topic | Practice Paper – 1 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |

**Max. Marks: 100** **Duration: 3hrs 15 mins**

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।** **1 × 10 = 10**

1. विश्वस्य मातरः काः ?
2. वृद्धपक्षिराजस्य नाम किम् ?
3. के निर्विमर्शाः ?
4. गौतमी का ?
5. राणाप्रतापः कस्मिन् ग्रामे अजायत ?
6. महाश्वेता किम् अजिघ्रत् ?
7. सुन्दरस्य पिता कः ?
8. कर्णस्य रक्षाकवचं किम् ?
9. कृतं कर्म कम् अनुगच्छति ?
10. ध्वन्यालोकः कन्नडभाषया केन अनूदितः ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (पञ्चानामेव) 5 × 2 = 10**

11. विक्रमादित्यः राक्षसं किम् उपदिशति ?
12. प्रव्राजकः निजान् अनुचरान् किम् उवाच ?
13. भारतसर्वकारः राणाप्रतापाय कथम् गौरवम् असूचयत् ?
14. पुण्डरीकस्य अनुरागः महाश्वेता कथं जानाति ?
15. शान्त्याः सौन्दर्यं वर्णयत ।
16. वज्राख्यः कीटः किं करोति ?
17. संस्कृताध्ययन विषये शस्त्रीणाम् अभिप्रायः ।

**III पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत । (त्रयाणामेव) 3 × 3 = 9**

18. भारतस्यास्य वर्षस्य नवभेदान् निबोधत ।
    समुद्रान्तरिता ज्ञेयास्ते त्वगाम्याः परस्परम् ॥
19. प्रतर्बुद्ध्वा च तत्सर्वं जहास सकलो जनः ।
    ननन्द स वणिक् सा च तत्सुता प्राप्तसत्पतिः ॥
20. मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।

दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥

21. धन्योस्मि गमनात्पूरवमीदृशी सम्पदागता ।
विना तु गुरुशुश्रुषां नान्यद्भाव्यं परं मम ॥

22. कामक्रोधौ तथा लोभं स्वादं शृङ्गारकौतुके ।
अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत्

**IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णामेव) 4 × 2 = 8**

23. त्वं विश्वस्य आर्तिं परिहरसि ।
24. सुखानि ते भर्तृकुलदेवताः वितरन्तु ।
25. मम हस्ते प्रभूतं धनं विद्यते ।
26. धैर्यधना हि साधवः ।
27. दृढीक्रीयतां चेतः ।
28. परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ।

**V दशवाक्यैः संस्कृतभाषया आङ्ग्लभाषया कन्नडभाषया वा उत्तरं लिखत । (पञ्चानामेव) 5 × 5 = 25**

29. भारतवर्षस्य भौगोलिकचित्रणं कुरुत ।
30. विक्रमादित्यस्य परोपकारगुणं वर्णयत ।
31. प्रव्राजकः ।
32. दीर्घापाङ्गप्रसङ्गः ।
33. भामाशाहस्य राजभक्तिः ।
34. पुण्डरीक-महाश्वेतायाः सरससंवादः ।
35. शान्तीदर्शनात् तरुणस्य चिन्ता सन्ततिः ।

**VI मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 4 × 1 = 4**

36. त्वम् आत्मनः ....... कुरु ।
37. सर्वः सगन्धेषु .......... ।
38. तयोः अहमीदृशी ....... समुत्पन्ना ।
39. ममापराधः ............. क्षन्तव्यः ।

(विश्वसीति, कृपया, आत्मजा,समीहितम्)

| Subject | Topic | Practice Paper – 1 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |

**VII संयोजयत ।** **4 × 1 = 4**

| **अ** | **ब** |
|---|---|
| शार्ङ्गरवः | गौरी |
| सिसीदिया | कुङ्कुमम् |
| ललाटे | कण्वशिष्यः |
| हंसः | राणाहमीरः |

**VIII रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणम् कुरुत ।(त्रयाणामेव)** **1 × 3 = 3**

40. परदुःखेन **साधवः** अत्यन्तदुखिनः भवन्ति ।
41. कन्या **मञ्जूषायां** प्रवेशिता ।
42. कालिदासस्य **सप्त** कृतयः ।
43. **भगवतः** सुन्दरं रूपमासीत् ।

**IX यथानिर्देशं कुरुत । (चतुर्णामेव)** **4 × 3 = 12**

44. **सन्धिं विभजत । / योजयत । (त्रयाणामेव)**
    अस्त्राभ्यासः, शक्तोऽसि, शशवत् +च, एतत् + नयेत्
45. **विग्रहवाक्यं लिखत। / समस्तपदं लिखत । (त्रयाणामेव)**
    जनाकीर्णाः, जीवमारणम्, राज्ञः पुत्रः, शौर्यस्य गाथा
46. **लिङ्ग-विभक्ति-वचनानि लिखत । (द्वयोरेव)**
    भूमौ, नगरी, परिणेतुः, सलिलम्
47. **लकार-पुरुष-वचनानि लिखत । (द्वयोरेव)**
    वितरन्तु, खिद्यसे, बभूव, वर्जयेत्,
48. **प्रयोगपरिवर्तनं कुरुत ।**
    स्त्रिया गृहं रक्ष्यते ।
    अथवा
    त्वया किमेतत् आचरितम् ।
49. **पदपरिचयं कुरुत (त्रयाणामेव)**
    पतन्, भवितुम्, आदाय, भूत्वा
50. **अलङ्कारं सलक्षणं विवृणुत ।**
    मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ।

अथवा
विद्यारत्नेन यो हीनः स हीनः सर्ववस्तुषु ।

**X कन्नडभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **5**

पुस्तकानि सम्पर्क साधनानि । बहून् विषयान् एकत्र संगृह्य सुचारुरूपेण निवेदयितुं पुस्तकमेव समर्थं माद्यमम् । पुस्तकमाद्यमेन शाशवतरूपेन विचारविनिमयः कर्तुं शक्यते । यः पुस्तकानि अधिकं पठति सः अतीव बुद्धिमान् भवति ।पूर्वं तालपत्रेषु भूर्जपत्रेषु च जनाः लिखन्ति स्म । मुद्रणस्य अन्वेषणानन्तरं पुस्तकस्य प्रचारः अधिकः सञ्जातः ।

**XI संस्कृतभाषया अनुवदत ।** **5**

ವಾರಣಾಸಿಯು ಗಂಗಾನದಿಯ ತಟದಲ್ಲಿದೆ. ಅದು ತನ್ನ ದೇವಾಲಯ, ರೇಷ್ಮೆ ವಸ್ತ್ರ ಮತ್ತು ಘಟ್ಟಗಳಿಂದಾಗಿ ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇದು ಭಾರತದ ಯಾತ್ರಾಸ್ಥಳ. ಇದು ಭಾರತದ ಪ್ರಾಚೀನ ನಗರಗಳಲ್ಲಿ ಒಂದು. ದೇಶದ ಎಲ್ಲ ಭಾಗಗಳಿಂದ ಇಲ್ಲಿಗೆ ಜನರು ಬರುವರು. ಗಂಗಾ ನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡುವರು. ವಿಶ್ವನಾಥನ ದೇವಾಲಯಕ್ಕೆ ಹೋಗುವರು. ದೇವನನ್ನು ಭಕ್ತಿಯಿಂದ ಪ್ರಾರ್ಥಿಸುವರು.

Banaras is on the banks of the river Ganga. It is famous for its temple, silk and ghats. It is a famous pilgrim centre in India. It is on of most ancient cites. People from all parts of the country visit this place. They take bath in river Ganga. They visit Vishvanatha temple. They pray him with devotion.

**XII इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** **1 × 5 = 5**

चाणाक्यः चन्द्रगुप्तस्य आचार्यः आसीत् । सः अर्थशास्त्रम् इति अद्भुतग्रन्थं रचितवान् । अद्यापि चाणाक्यनाम्नि प्रसिद्धः नीतिश्लोकानां अनेके सङ्कलितग्रन्थाः उपलभ्यन्ते । तेषु वृद्धचाणाक्यम्, चाणाक्यनीतिसारः, लघुचाणाक्यम् इत्यदयः प्रमुखाः । चणकस्य अपत्यं अतः सः चाणाक्य इति प्रसिद्धः । कुटिलगोत्रोत्पन्नात् कौतिल्य इति नामान्तरमपि तस्य विद्यते ।

i) चाणाक्यः कस्य आचार्यः आसीत् ?

ii) अर्थशास्त्रम् कः रचितवान् ?

iii) चाणाक्यस्य उपलब्देषु ग्रन्थेषु प्रमुखाः के ?

iv) चाणाक्य इति कथं तस्य नाम प्रसिद्धम् ?

v) चाणाकस्य नामन्तरम् किम् ?

| Subject | Topic | Practice Paper – 1 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |